1021

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 593

Title : Ramastavaraja

Jatre

रामस्तवराजः from सनत्कुमारसंहिता

Rāmastavarāja from	Title
Sanatkumāra Saṃhitā	Author
	Editor
	Year, Vols.
	Publisher
593 : १ स्तोत्र	Remarks

श्रीगणेशाय नमः अस्य श्रीरामचंद्रस्तवराजस्तोत्रमंत्रस्य सनत्कुमार ऋषये नमः अनुष्टुप्छंद
रामस्तव से नमो मुखे श्रीरामदेवतायै नमः हृदि सीताबीजाय नमो गुह्ये हनुमच्छक्तये नमः पादयोः श्री
रामप्रीत्यर्थे जपे विनियोगः सूत उवाच सर्वशास्त्रार्थतत्वज्ञं व्यासं सत्यवतीसुतं धर्म
१ पुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरं १ युधिष्ठिर उवाच भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशा
रद किं तत्वं किं परं जाप्यं किं ध्यानं मुक्तिसाधनं २ श्रोतुमिच्छामि तत्सर्वं ब्रूहि मे मुनिसत्तम श्री
वेदव्यास उवाच धर्मराज महाभाग शृणु वक्ष्यामि तत्वतः ३ यत्परं यद्गुणातीतं यज्ज्योतिरम
लं शिवं तदेव परमं तत्वं कैवल्यपदकारणं ४ श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकं ब्रह्मह
त्यादिपापघ्नमिति वेदविदो विदुः ५ श्रीराम रामेति जना ये जपंति च सर्वदा तेषां भुक्तिश्च मुक्तिश्च
च धीमता भविष्यति न संशयः ६ स्तवराजः पुरा प्रोक्तो नारदेन महात्मना तत्सर्वं संप्रवक्ष्यामि हरिध्यानपुरः १
सरं ७ तापत्रयाग्निशमनं सर्वाघौघनिकृंतनं दारिद्र्यदुःखशमनं सर्वसंपत्करं शिवं ८ वि
ज्ञानफलदं दिव्यं मोक्षैकफलसाधनं नमस्कृत्य प्रवक्ष्यामि रामं कृष्णं जगन्मयं ९ अयोध्यानग
रे रम्ये रत्नमंडपमध्यगे स्मरेत्कल्पतरोर्मूले रत्नसिंहासनं शुभं १० तन्मध्येऽष्टदलं पद्मं ना
नारत्नैश्च वेष्टितं स्मरेन्मध्ये दाशरथिं सहस्रादित्यतेजसं ११ पितुरंकगतं राममिंद्रनीलमणिप्रभं

कोमलांगं विशालाक्षं विद्युद्वर्णांबरावृतं १२ भानुकोटिप्रतीकाशं किरीटेन विराजितं रत्नग्रैवेयकेयूरं
रत्नकुंडलमंडितं १३ रत्नकंकणमंजीरकटिसूत्रैरलंकृतं श्रीवत्सकौस्तुभोरस्कं मुक्ताहारोपशोभितं १४
दिव्यरत्नसमायुक्तं मुद्रिकाभिरलंकृतं राघवं द्विभुजं बालं राममीषत्स्मिताननं १५ तुलसीकुंदमंदार
पुष्पमाल्यैरलंकृतं कर्पूरागरुकस्तूरीदिव्यगंधानुलेपनं १६ योगशास्त्रेष्वभिरतं योगीशं योगदायकं
सदा भरतसौमित्रिशत्रुघ्नैरुपशोभितं १७ विद्याधरसुराधीशैः सिद्धगंधर्वकिंनरैः योगींद्रैर्नारदाद्यै
श्च स्तूयमानमहर्निशं १८ विश्वामित्रवसिष्ठादिमुनिभिः परिसेवितं सनकादिमुनिश्रेष्ठैर्योगिवृंदैश्च से
वितं १९ रामं रघुवरं वीरं धनुर्वेदविशारदं मंगलायतनं देवं रामं राजीवलोचनं २० सर्वशास्त्रार्थतत्वज्ञ
मानंदकरसुंदरं कौशल्यानंदनं रामं धनुर्बाणधरं हरिं २१ एवं संचिंतयन्विष्णुं यज्ज्योतिरमलं विभुं
प्रहृष्टमानसो भूत्वा मुनिवर्यः सनातनः २२ सर्वलोकहितार्थाय तुष्टाव रघुनंदनं कृतांजलिपुटो भूत्वा
चिंतयन्नद्भुतं हरिं २३ यदेकं यत्परं नित्यं यदानंदं चिदात्मकं यदेकं व्यापकं लोके तद्रूपं चिंतयाम्यहं
२४ विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुं श्रीरामचंद्रं हरिमादिदेवं परात्परं राममहं
भजामि २५ कविं पुराणं पुरुषं पुरस्तात्सनातनं योगिनमीशितारं अणोरणीयांसमनंतवीर्यं प्राणे
श्वरं राममसौ ददर्श २६ श्री नारद उवाच नारायणं जगन्नाथमभिरामं जगत्पतिं कविं पुराणं वागीशं
रामं दशरथात्मजं २७ राजराजं रघुवरं कौशल्यानंदवर्धनं भर्गं वरेण्यं विश्वेशं रघुनाथं जगद्गुरुं २८

रामस्त॰ सत्यसंधं सत्यप्रियं श्रेष्ठं जानकीवल्लभं विभुं सौमित्रिपूर्वजं शांतं कामदं कमलेक्षणं २९ आदित्यं रविमीशानं घृणिःसू
र्यमनामयं आनंदरूपिणं सौम्यं राघवं करुणालयं ३० जामदग्न्यं तपोमूर्त्तिं रामं परशुधारिणं वाक्पतिं व
२ रदं वाच्यं श्रीपतिं पक्षिवाहनं ३१ श्रीशार्ङ्गधारिणं रामं चिन्मयानंदविग्रहं हलधृग्विष्णुमीशानं बलरामं
कृपानिधिं ३२ श्रीवल्लभं कृपानाथं जगन्मोहनमच्युतं मत्स्यकूर्मवराहादिरूपधारिणमव्ययं ३३ वासु
देवं जगद्योनिमनादिनिधनं हरिं गोविंदं गोपतिं विष्णुं गोपीजनमनोहरं ३४ गोपालं गोपपरिवारं गोपक
न्यासमावृतं विद्युत्पुंजप्रतीकाशं रामं कृष्णं जगन्मयं ३५ गोगोपिकासमाकीर्णं वेणुवादनतत्परं कामरूपं
कलावंतं कामिनीकामदं विभुं ३६ मन्मथं मथुरानाथं माधवं मकरध्वजं श्रीधरं श्रीकरं श्रीशं श्रीनिवासं परात्परं ३७
भूतेशं भूपतिं भद्रं विभूतिं भूतिभूषणं सर्वदुःखहरं वीरं दुष्टदानववैरिणं ३८ श्रीनृसिंहं महाबाहुं मह
तं दीप्ततेजसं चिदानंदमयं नित्यं प्रणवं ज्योतिरूपिणं ३९ आदित्यमंडलगतं निश्चितार्थस्वरूपिणं भक्तप्रि
५ यं पद्मनेत्रं भक्तानामीप्सितप्रदं ४० कौसल्येयं कलामूर्त्तिं काकुत्स्थं कमलाप्रियं सिंहासने समासीनं
नित्यव्रतमकल्मषं ४१ विश्वामित्रप्रियं दांतं स्वदारानियतव्रतं यज्ञेशं यज्ञपुरुषं यज्ञपालनतत्परं ४२ २
सत्यसंधं जितक्रोधं शरणागतवत्सलं सर्वक्लेशापहरणं विभीषणवरप्रदं ४३ दशग्रीवहरं रौद्रं केशवं के
शिमर्दनं वालिप्रमथनं वीरं सुग्रीवेप्सितराज्यदं ४४ नरवानरदेवैश्च सेवितं हनुमत्प्रियं शुद्धं सूक्ष्मं
परं शांतं तारकं ब्रह्मरूपिणं ४५ सर्वभूतात्मभूतस्थं सर्वाधारं सनातनं सर्वकारणकर्तारं निदानं प्र
कृतेः परं निरामयं निराभासं निरवद्यं निरंजनं नित्यानंदं निराकारमद्वैतं तमसः परं ४७ परात्परतरं
२

तत्त्वं सत्यानंदं चिदात्मकं मनसा शिरसा नित्यं प्रणमामि रघूत्तमं ४८ सूर्यमंडलमध्यस्थं रामं सीतासमन्वितं नमामि
पुंडरीकाक्षममेयं गुरुतत्परं ४९ नमोस्तु वासुदेवाय ज्योतिषांपतये नमः नमोस्तु रामदेवाय जगदानंदरू
पिणे ५० नमो वेदांतनिष्ठाय योगिने ब्रह्मवादिने मायामयनिरस्ताय प्रपन्नजनसेविने ५१ वंदामहे
महेशानं चंडकोदंडखंडनं जानकीहृदयानंदं वंदामि रघुनंदनं ५२ उत्फुल्लामलकोमलोत्पलदलश्यामाय
रामापते कामाय प्रमदामनोहरगुणग्रामाय रामात्मने योगारूढमुनींद्रमानससरोहंसाय संसारविध्वं
सायस्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ५३ भवोद्भवं वेदविदां वरिष्ठमादित्यचंद्रानलसुप्रभावं स
र्वात्मकं सर्वगतस्वरूपं नमामि रामं तमसः परस्तात् ५४ निरंजनं निष्प्रतिमं निरीहं निराश्रयं निष्कलमप्र
पंचं नित्यं ध्रुवं निर्विषयस्वरूपं निरंतरं राममहं भजामि ५५ भवाब्धिपोतं भरताग्रजं तं भक्तिप्रियं भा
नुकुलप्रदीपं भूतत्रिनाथं भुवनाधिपं तं भजामि रामं भवरोगवैद्यं ५६ सर्वाधिपत्यं समरांगधीरं सत्यं चि
दानंदमयस्वरूपं सत्यं शिवं शांतिमयं शरण्यं सनातनं राममहं भजामि ५७ कार्यक्रियाकारणमप्र
मेयं कविं पुराणं कमलायताक्षं कुमारवेद्यं करुणामयं तं कल्पद्रुमं राममहं भजामि ५८ त्रैलोक्यना
थं सरसीरुहाक्षं दयानिधिं द्वंद्वविनाशहेतुं महाबलं वेदनिधिं सुरेशं सनातनं राममहं भजामि ५९ वेदांत
वेद्यं कविमीशितारमनादिमध्यांतमचिंत्यमाद्यं अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परस्तात् ६०
अशेषवेदात्मकमादिसंज्ञमजं हरिं विष्णुमनंतमाद्यं अपारसंवित्सुखमेकरूपं परात्परं राममहं भजामि ६१
तत्त्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकं राजाधिराजं रविमंडलस्थं विश्वेश्वरं राममहं भजामि ६२

रामस्तव. लोकाभिरामं रघुवंशनाथं हरिं चिदानंदमयं मुकुंदं अशेषविद्याधिपतिं कवींद्रं नमामि रामं तमसः परस्तात् ६३
योगींद्रसंघैः शतसेव्यमानं नारायणं निर्मलमादिदेवं नतोस्मि नित्यं जगदेकनाथं आदित्यवर्णं तमसः परस्तात् ६४
२ विश्वाहितं विश्वसृजं विराजं राजेंद्रमीशं रघुवंशनाथं अचिंत्यमव्यक्तमनंतमूर्तिं ज्योतिर्मयं राममहं भजामि ६५
अशेषसंसारविकारहीनं मादित्यसंपर्कि सुखाभिरामं समस्तसाक्षीं तमसः परस्तात् नारायणं विष्णुमहं भजामि ६६
मुनींद्रगुह्यं परिपूर्णमेकं कलानिधिं कल्मषनाशहेतुं परात्परं यत्परमं पवित्रं नमामि रामं महतो महांतं ६७
ब्रह्मा विष्णुश्च रुद्रश्च देवेंद्रो देवतास्तथा आदित्यादिग्रहाश्चैव त्वमेव रघुनंदन ६८ तापसा ऋषयः सिद्धाः सा-
ध्याश्च मरुतस्तथा विप्रा वेदास्तथा यज्ञाः पुराणं धर्मसंहिताः ६९ वर्णाश्रमास्तथा धर्मा वर्णधर्मास्तथैव च
द.पः ८ यक्षराक्षसगंधर्वा दिक्पाला दिग्गजादयः ७० सनकादिमुनिश्रेष्ठास्त्वमेव रघुपुंगव वसवोष्टौ त्रयः
कालो रुद्रा एकादश स्मृताः ७१ तारकादशदिक्चैव त्वमेव रघुनंदन सप्तद्वीपाः समुद्राश्च नगा नद्यः
स्तथा द्रुमाः ७२ स्थावरा जंगमाश्चैव त्वमेव रघुनायक देवतिर्यङ्मनुष्याणां दानवानां तथैव च माता पिता
तथा भ्राता त्वमेव रघुवल्लभ सर्वेषां त्वं परं ब्रह्म त्वन्मयं सर्वमेव हि ७४ त्वमक्षरं परं ज्योतिस्त्वमेव पुरुषोत्तम त्वमेव
तारकं ब्रह्म त्वत्तोन्यो नैव किंचन ७५ शांतं सर्वगतं सूक्ष्मं परं ब्रह्म सनातनं राजीवलोचनं रामं प्रणमामि जग- ३
त्पतिं ७६ श्रीवेदव्यास उवाच ततः प्रसन्नः श्रीरामः प्रोवाच मुनिपुंगव तुष्टोस्मि मुनिशार्दूल वृणी-
ष्व वरमुत्तमं ७७ श्रीनारद उवाच यदि तुष्टोसि सर्वज्ञ श्रीराम करुणानिधे त्वन्मूर्तिदर्शनेनैव कृतार्थो-
हं भमेपितं ७८ धन्योहं कृतकृत्योहं पुण्योहं पुरुषोत्तम अद्य मे सफलं जन्म जीवितं सफलं च मे ७९
अद्य मे सफलं ज्ञानमद्य मे सफलं तपः अद्य मे सफलो यज्ञस्त्वत्पादाब्जस्य दर्शनात् ८० अद्य मे सफलं

सर्वं त्वन्नामस्मरणं तथा त्वत्पादांभोरुहद्वंद्वे सद्भक्तिं देहि राघव ८१ ततः परमसंप्रीतो रामः प्रहस्य ना-
रदं श्रीराम उवाच मुनिवर्य महाभाग मुने त्विष्टं ददामि ते यत्त्वया चेप्सितं सर्वं मनसा तद्भविष्यति ८२
श्रीनारद उवाच वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु इदं प्रियं नाथ वरं प्रयच्छ
पुनः पुनस्त्वामहमेव याचे ८३ श्रीवेदव्यास उवाच इत्येवमीडितो रामः प्रादात्तस्मै वरांतरं वीरो राम
महातेजाः सच्चिदानंदविग्रहः ८४ अद्वैतममलं ज्ञानं स्वनामस्मरणं तथा अंतर्धानं जगामाथ पुरत-
स्तस्य राघवः ८५ इति श्री रघुनाथस्य स्तवराजमनुत्तमं सर्वसौभाग्यसंपत्तिदायकं मुक्तिदं शुभं ८६
कथितं ब्रह्मपुत्रेण वेदानां सारमुत्तमं गुह्याद्गुह्यतमं दिव्यं तव स्नेहात्प्रकीर्तितं ८७ यः पठे-
च्छृणुयाद्वापि त्रिसंध्यं श्रद्धयान्वितः ब्रह्महत्यादिपापानि तत्समानि बहूनि च ८८ स्वर्ण-
स्तेयसुरापानगुरुतल्पगतानि च गोवधाद्युपपापानि अनृतात्संभवानि च ८९ सर्वैः प्र-
मुच्यते पापैः कल्पायुतशतोद्भवैः मानसं वाचिकं पापं कर्मणा समुपार्जितं ९० श्रीरामस्मरण-
नैव तत्क्षणान्नश्यति ध्रुवं इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ९१ रामः सत्यं परं ब्रह्म रामा-
त्किंचिन्न विद्यते तस्माद्रामस्वरूपं हि सत्यं सत्यमिदं जगत् ९२ श्रीरामचंद्र रघुपुंगव राज-
वर्य राजेंद्र राम रघुनायक राघवेश राजाधिराज रघुनंदन रामभद्र दासोस्म्यहं भवतः शरणागतोस्मि
९३

रामस्तव वैदेहीसहितं सुरद्रुमतले हैमे महामंडपे मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितं ९४ अग्रेवा-
चयति प्रभंजनसुते तत्त्वं मुनिभिः परं व्याख्यांतं भरतादिभिः परिवृतं रामं भजे श्यामलं ९५ रामं रत्न-
४ किरीटकुंडलयुतं केयूरहारान्वितं सीतालंकृतवामभागममलं सिंहासनस्थं विभुं सुग्रीवादि-
हरीश्वरैः सुरगणैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं प्रभुं ९६ सकल-
गुणनिधानं योगिभिः स्तूयमानं भुजविजितविमानं राक्षसेंद्रादिमानं महितवृषभयानं सीतया
शोभिमानं स्मृतहृदयविमानं ब्रह्मरामाभिधानं ९७ रघुवर तव मूर्तिर्मामके मानसाब्जे नरकग-
तिहरं ते नामधेयं मुखे मे अनिशमतुलभक्त्या मस्तके त्वत्पदाब्जे भवजलनिधिमग्नं रक्ष मामा-
र्तबंधो ९९ रामरत्नमहं वंदे चित्रकूटपतिं हरिं कौसल्याकुक्षिसंभूतं जानकीकंठ-
भूषणं १०० इति श्रीसनत्कुमारसंहितायां नारदोक्तो रामस्तवराजः संपूर्णः रामार्पितोस्तु

४

593